सौहार्द्दं,क्ली,(सुहृदः सुहृदयस्य वा भावः कर्म्म वा। सुहृत् सुहृदय वा+"हायनान्तयुवादिभ्योऽण्।"५।१।१३०। इत्यण्। हृदयस्य हृदादेशः। "हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च।" ७।३।१९। इति उभयपदवृद्धिः।) सुहृदो भावः। तत्पर्य्यायः। सख्यम् २ सौहृदम् ३ साप्तपदीनम् ४ मैत्री ५ अजर्य्यम् ६ सङ्गतम्७ इति हेमचन्द्रः॥ (यथा, महाभारते।१।७७।११।

"सौहार्द्दं चानुरागे च वेत्थ मे भक्तिमुत्तमाम्।
न मामर्हसि धर्म्मज्ञ त्यक्तुं भक्तामनागसम्॥")

सौहार्द्दः,पुं,(सुहृदोऽपत्यमिति। सुहृद्+अण्। सुहृत्पुत्त्रः। इति केचित्॥

सौहार्द्यं, क्ली, (सुहृदयस्य भावः। सुहृदय+ ष्यञ्। "वा शोकष्यञ्रोगेषु।" ६।३।५१। इति हृदयस्य हृदादेशः।) सौहार्द्दम्। इति सिद्धान्तकौमुदी॥

सौहित्यं, क्ली, (सुहितस्य भावः कर्म्म वा। सुहित+"पत्यन्तपुरोहितादिभ्यो यक्।" ५।१।१२८। इति यक्।) तृप्तिः। इत्यमरः। २।९।५६॥ (यथा, महाभारते।१२।२४४।१३।

"अहेरिव गणाद्भीतः सौहित्यान्नरकादिव।
कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः॥"

सौहृदं, क्ली,(सुहृदः कर्म्म भावो वा। सुहृत्+ अण्।) सख्यम्। सौहार्द्दम्। इति हेमचन्द्रः॥ तस्य प्राशस्त्यं यथा,—

"तद्भुज्यते यद्द्विजभुक्तशेषं
स बुद्धिमान् यो न करोति पापम्।
तत् सौहृदं यत् क्रियते परोक्षे
दम्भं विना यः क्रियते स धर्म्मः॥"

इति गारुडे ११५ अध्यायः॥

स्कद, द ङ आप्लवे। उद्धृतौ। उत्प्लुत्य गत्याम् इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सक०च-सेट्।) आद्यस्वरी। द, स्कन्द्यते। ङ,स्कन्दते चिस्कन्दिषते। पञ्चमस्वरीति धातुप्रदीपरामौ। स्कन्दते स्कुन्दते चापि षड़ाप्लवनवाचिनः। इति भट्टमल्लोऽपि। चुस्कुन्दिषते। इति दुर्गादासः॥

स्कन्द,इर् और शोषणे। गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) इर्, अस्कदत्। अस्कान्त्सीत्। औ, स्कन्ता चस्कन्द। इति दुर्गादासः॥

स्कन्द, त श समाहृतौ। इति कविकल्पद्रुमः॥ (अनन्तचुरा०-पर०-सक०-सेट्।) दन्त्यवर्गतृतीयोपधोऽयम्। तच्चतुर्थोपध इति केचित्। स्कन्दयति स्कन्दापयति अचस्कन्दत्। इति दुर्गादासः॥

स्कन्दः, पुं, (स्कन्दते उत्प्लुत्य गच्छति स्कन्दति शोषयति दैत्यान् वा। स्कन्द+अच्।) कार्त्तिकेयः। इत्यमरः।१।१।४२॥ तस्य उत्पत्तिषडाननपञ्चनामचतुर्म्मूर्त्त्यभिषेकगणवाहनास्त्रादि यथा,—

नारद उवाच।

"किमर्थमेषकः क्रौञ्चो भिन्नः स्कन्देन सुव्रत।
एतन्मे विस्तराद्ब्रह्मन् कथयस्वामितद्युते॥

पुलस्त्य उवाच।

एतां ते कथयिष्यामि कथां पुण्यां पुरातनीम्।
यशोवृद्धिं कुमारस्य कार्त्तिकेयस्य नारद॥
यत् पीतं वीतिहोत्रेण वीर्य्यं श्रक्तं पिनाकिनः।
तेनाक्रान्तोऽभवद्ब्रह्मन् मन्दतेजा हुताशनः॥
ततो जगाम देवानां सकाशममितद्युतिः।
दैवतैः प्रहितस्तूर्णं ब्रह्मलोकं जगाम ह॥
स गच्छन् कुटिलां देवीं ददर्श पथि पावकः।
तां दृष्ट्वा प्राह चाधत्स्व तेजो यन्मम दुर्द्धरम्॥
महेश्वरेण सन्त्यक्तं निर्द्दहेत् भुवनान्यपि।
तद्धारणाच्च कुटिले पुत्त्रो धन्यो भविष्यति॥
इत्यग्निना सा कुटिला श्रुत्वा सुतमनुत्तमम्।
पश्चित्तमात्रं जग्राह तेज ऐशं महापगा॥
ततस्त्वधारयद्देवी शार्व्वं तेजः स्वपूपुषत्।
हुताशनोऽपि च भयात् यत्र तत्र परिभ्रमन्॥
पञ्चवर्षसहस्राणि ह्यध्यास्ते हव्यभुक् ततः।
मांसमस्थीनि रक्तानि मेदोमज्जस्त्वचस्तथा॥
रोमाणि चाक्षिकेशाद्याः सर्व्वे जाता हिरण्मयाः।
हिरण्यरेता लोकेऽस्मिन् विख्यातः पावकस्तदा
पञ्चवर्षसहस्राणि कुटिला ज्वलनोपमम्।
धारयन्ती तदा गर्भं ब्रह्मणः स्थानमागता॥
पितामहस्तां चोणाङ्गीं सन्तप्यन्तीं महापगाम्
दृष्ट्वा पप्रच्छ केनायं तव गर्भः समाहितः॥
सा चाह शाङ्करं तेजः पावकेन समर्पितम्।
अप्यशक्तेन तेनाद्य निक्षिप्तं मयि सत्तम॥
पञ्चवर्षसहस्राणि धारयन्त्याः पितामह।
अन्नपानादिकमपि न मेऽपच्यत कर्हिचित्॥
तच्छ्रुत्वा भगवानाह गच्छ त्वमुदयं गिरिम्।
तत्रास्ति योजनशतं विस्तीर्णं सुरसेवितम्॥
तमनुप्राप्य सुश्रोणि विस्तीर्णे गिरिसानुनि।
दशवर्षसहस्रान्ते ततो बालो भविष्यति॥
ब्रह्मणो वचनं श्रुत्वा कुटिला गिरिमागता।
आगत्य गर्भं तत्याज सुखेनैवाद्रिनन्दिनी॥
सा तु संत्यज्य तं बालं ब्रह्माणं सहसागमत्।
आपोमयी मन्त्रवशात् संयता कुटिला सती॥
तेजसा चापि शार्व्वेण रौक्मः शरवणोऽभवत्।
तन्निवासवतश्चान्ये पादपा मृगपक्षिणः॥
ततो दशसु पूर्णेषु शरद्दशशतेष्वथ।
बालार्कदीप्तिः संजातो बालः कमललोचनः॥
उत्तानशायी भगवान् दिव्ये शरवणे स्थितः।
मुखेऽङ्गुष्ठं समाक्षिप्य रुरोद घनराड़िव॥
एतस्मिन्नन्तरे देव्यः कृत्तिकाः षट् सुतेजसः।
ददृशुः स्वेच्छया यान्त्यो बालं शरवणे स्थितम्॥
कृपायुक्ताः समाजग्मुर्यत्र स्कन्दः स्थितोऽभवत्
अहं पूर्व्वमहं पूर्व्वं तस्मै स्तन्ये हि चुक्रुशुः॥
विवदन्तीः स ता दृष्ट्वा षण्मुखः समजायत।
अबीभरंस्तास्ताः सर्व्वाः शिशुं स्नेहाच्च कृत्तिकाः॥
म्रियमाणः सतीभिस्तु बालो वृद्धिमगान्मुने।
कार्त्तिकेय इति ख्यातो जातः स बलिनांवरः॥
एतस्मिन्नन्तरे ब्रह्मन् पावकं प्राह पद्मभूः।
कियत्प्रमाणः पुत्त्रस्ते वर्त्तते साम्प्रतं गुहः॥
स तद्वचनमाकर्ण्य अजानन् तं हरात्मजम्।
प्रोवाच पुत्त्रं देवेश न वेद्मि कतमो गुहः॥
तं प्राह भगवान् युक्तं तेजः पीतं पुरा त्वया।
त्रैयम्बकं त्रिलोकेशं जातः शरवणे शिशुः॥
श्रुत्वा पितामहवचः पावकस्त्वरितोऽभ्यगात्।
उदयाद्रिञ्च कुटिला तं ददर्श हिते रता॥
पप्रच्छ कुटिला देवी क्व शीघ्रं व्रजसे कवे।
सोऽब्रवीत् पुत्त्रदृष्ट्यर्थं जातं शरवणे शिशुम्॥
साब्रवीत्तनयो मह्यं ममेत्याह च पावकः।
विवदन्तौ ददर्शाथ स्वेच्छाचारी जनार्द्दनः॥
तौ पप्रच्छ किमर्थं वा विवादमिह चक्रतुः।
तमूचतुः पुत्त्रहेतो रुद्रशुक्रोद्भवादिति॥
तावुवाच हरिर्द्देवो गच्छतं त्रिपुरान्तकम्।
स यद्वक्ष्यति देवेशः कुरुतं तदसंशयम्॥
इत्युक्तौ वासुदेवेन कुटिलाग्नी हरान्तिकम्।
समभ्येत्योचतुस्तथ्यं कस्य पुत्त्रो भवेद्गुहः॥
रुद्रस्तद्वाक्यमाकर्ण्य हर्षनिर्भरमानसः।
दिष्ट्या दिष्ट्येति गिरिजां प्रोद्भूतपुलकोऽब्रवीत्
ततोऽम्बिका प्राह हरं देव गच्छाव तं शिशुम्।
दृष्ट्वा समागमेद्यां स तस्याः पुत्त्रो भविष्यति॥
वाढ़मित्येव भगवान् समुत्तस्थौ वृषध्वजः।
सहोमया कुटिलया पावकेन च धीमता॥
सम्प्राप्तास्ते शरवणं हरोमाकुटिलाग्नयः।
ददृशुः शिशुकं तत्र कृत्तिकोत्सङ्गशायिनम्॥
ततः स बालकस्तेषां मत्वा चिन्तितमादरात्
योगी चतुर्म्मूर्त्तिरभूत् षण्मुखः स शिशुः पितुः॥
कुमारः शङ्करमगात् विशाखो गिरिजामगात्
कुटिलामगमच्छाखो नैगमेयोऽग्निमभ्यगात॥
ततः प्रीतियुतो रुद्रः उवाच कुटिला तथा।
पावकश्चापि देवेशः परां मुदमवाप च॥
ततोऽब्रुवन् कृत्तिकास्ताः षण्मुखः किं हरात्मजः।
ता अब्रवीत् हरः प्रीत्या विवेश वचनं मुने॥
नाम्ना तु कार्त्तिकेयेति युष्माकञ्च भवत्वसौ।
कुटिलायाः कुमारेति पुत्त्रोऽयं भविताव्ययः॥
स्कन्द इत्येव विख्यातो गौरीपुत्त्रो भवत्वसौ।
गुह इत्येव नाम्ना च ममासौ तनयः स्मृतः॥
महासेन इति ख्यातो हुताशस्यास्तु पुत्त्रकः।
सारस्वत इति ख्यातः सुतः शरवणस्य च॥
एवमेष महायोगी पृथिव्यां ख्यातिमेष्यति।
षड़ास्यत्वान्महाबाहुः षण्मुखो नाम गीयते॥
इत्येवमुक्त्वा भगवान् शूलपाणिः पितामहम्।
सस्मार दैवतैः सार्द्धं तेऽप्याजग्मुस्त्वरान्विताः॥
प्रणिपत्य च कामारिं उमाञ्च गिरिनन्दिनीम्।
दृष्ट्वा हुताशनं प्रीत्या कुटिलां कृत्तिकास्तथा॥
ददृशुर्बालमत्युग्रं षण्मुखं सूर्य्यसन्निभम्।
मुष्णन्तमिव चक्षूंषि देवानां स्वेन तेजसा॥
कौतुकाभिहृताः सर्व्वे एवमूचुः सुरोत्तमाः।